# Shri Ganesha Stuti Brahmadyakrita

# બ્રહ્માદ્યાકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Brahmadyakrita

File name : gaNeshastutiHbrahmAdyAkRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM chaturthaH khaNDaH | adhyAyaH 6 | 4.6. 24-38||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# બ્રહ્માદ્યાકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
બ્રહ્માદ્યા ઊચુઃ ।
નમસ્તે ગણનાથાય વિઘ્નાનાં પતયે નમઃ ।
અનાથાનાં સુનાથાય નમો વિઘ્નનિવારણ ॥ ૨૪॥
ભક્તેભ્યઃ સર્વદાત્રે તે નિરાકારાય સાક્ષિણે ।
અમેયાયાપ્રતર્ક્યાય હેરમ્બાય નમો નમઃ ॥ ૨૫॥
ગજાનનાય દેવાય શૂર્પકર્ણાય તે નમઃ ।
મહોદરાય સર્વેષામાદિપૂજ્યાય વૈ નમઃ ॥ ૨૬॥
સર્વાદયે મહાદાત્રે સર્વપૂજ્યાય વૈ નમઃ ।
સર્વભાવસ્થિતાયૈવ ઢુણ્ઢિરાજાય તે નમઃ ॥ ૨૭॥
સ્વાનન્દવાસિને તુભ્યં યોગશાન્તિમયાય ચ ।
યોગિભ્યો યોગદાત્રે વૈ યોગાનાં પતયે નમઃ ॥ ૨૮॥
સૃષ્ટિકર્ત્રે ચ પાત્રે તે સૃષ્ટિહર્ત્રે નમો નમઃ ।
ગણેશાય ગુણાનાં વૈ ચાલકાય નમો નમઃ ॥ ૨૯॥
આત્મનેઽનાત્મને ચૈવ કારણાનાં પ્રકાશિને ।
બ્રહ્મેશાય સદાનાથ દેવપાલકરૂપિણે ॥ ૩૦॥
નિવારય મહાવિઘ્નં સહસા સમુપસ્થિતમ્ ।
ગ્રસિષ્યતિ ન ચેદણ્ડમસ્માન્ વૈ નાત્ર સંશયઃ ॥ ૩૧॥
ત્વદીયપાદપદ્મસ્ય વયં દાસા ગજાનન ।
મરિષ્યામો યદા નાથ યશસ્તવ ગતં તદા ॥ ૩૨॥
અધુના રક્ષ દેવેશ ન વયં દ્રષ્ટુમુગ્રકમ્ ।
ક્ષમા ગચ્છન્તિ નઃ પ્રાણા રક્ષ વિઘ્નેશ રક્ષ ભોઃ ॥ ૩૩॥
એવં સંસ્તુવતાં તેષાં પુરઃ સોઽપિ મહાપુમાન્ ।
ગણેશાકારરૂપેણ બભૂવ નૃપસત્તમ ॥ ૩૪॥
તતસ્તે તં પ્રણેમુશ્ચ પૂજયામાસુરાદરાત્ ।

માનસીં સ્વસુતાં તસ્મૈ દદુઃ સર્વે શિવાદયઃ ॥ ૩૫॥
સરસ્વતીં દદૌ બ્રહ્મા વિષ્ણુઃ પુષ્ટિં ચ માનસીમ્ ।
યોગિનીં શઙ્કરશ્ચૈવ મોહિનીં જગદમ્બિકા ॥ ૩૬॥
સઞ્જીવનીં દદૌ તસ્મૈ ભાનુઃ સર્વપ્રિયઙ્કરઃ ।
એવં સમ્પૂજ્ય વિઘ્નેશં પ્રણતાસ્તે મહીપતે ॥ ૩૭॥
ઉવાચ તાન્ સ ઉત્થાપ્ય વિઘ્નેશો ભક્તિભાવતઃ ।
વિષ્ણુમુખ્યાન મહેશાંશ્ચ મેઘગમ્ભીરનિઃસ્વનઃ ॥ ૩૮॥

ઇતિ બ્રહ્માદ્યાકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ચતુર્થઃ ખણ્ડઃ । અધ્યાયઃ ૬ । ૪.૬। ૨૪-૩૮॥

- .. mudgalapurANaM chaturthaH khaNDaH . adhyAyaH 6 . 4.6. 24-38..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Brahmadyakrita*
pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*